श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीपद्मपुराणे उत्तरखण्डे उमापतिनारदसंवादे

# ॥ श्री लघुरामरक्षास्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लघुरामरक्षास्तोत्रम् ॥

ओं रामरक्षास्तोत्रस्य श्रीमहर्षिर्विश्वामित्रऋषिः।
श्रीरामो देवता।
अनुष्टुप्छन्दः।
विष्णुप्रीत्यर्थे जपे विनियोगः।

महादेव उवाच
अतसीपुष्पसङ्काशं पीतवाससमच्युतम्।
ध्यात्वा वै पुण्डरीकाक्षं श्रीरामं विष्णुमव्ययम् ॥ **1** ॥

पातु मे हृदयं रामः श्रीकण्ठः कण्ठमेव च।
नाभिं पातु मखत्राता कटिं मे विश्वरक्षकः ॥ **2** ॥

करौ पातु दाशरथिः पादौ मे विश्वरूपधृत्।
चक्षुषी पातु वै देवस्सीतापतिरनुत्तमः ॥ **3** ॥

शिखां मे पातु विश्वात्मा कर्णौ मे पातु कामदः।
पार्श्वयोस्तु सुरत्राता कालकोटिदुरासदः ॥ **4** ॥

अनन्तः सर्वदा पातु शरीरं विश्वनायकः।
जिह्वां मे पातु पापघ्नो लोकशिक्षाप्रवर्तकः ॥ **5** ॥

राघवः पातु मे दन्तान् केशान् रक्षतु केशवः।
सक्थिनी पातु मे दत्तविजयो नाम विश्वसृक् ॥ **6** ॥

एतां रामबलोपेतां रक्षां यो वै पुमान् पठेत्।
स चिरायुः सुखी विद्वान् लभते दिव्यसंपदम्॥ **7**॥

रक्षां करोतु भूतेभ्यः सदारक्षा तु वैष्णवी।
रामेति रामभद्रेति रामचन्द्रेति यः स्मरेत्॥ **8**॥

विमुक्तः स नरः पापान्मुक्तिं प्राप्नोति शाश्वतीम्।
वसिष्ठेन त्विदं प्रोक्तं गुरवे विष्णुरूपिणे॥ **9**॥

ततो मे ब्रह्मणः प्राप्तं मयोक्तं नारदं प्रति।
नारदेन तु भूलोके प्रापितं सुजनेष्विह॥ **10**॥

सुप्त्वा वाथ गृहे वापि मार्गे गच्छन्त एव वा।
ये पठन्ति नरश्रेष्ठास्ते नराः पुण्यभागिनः॥ **11**॥

॥ इति श्री लघुरामरक्षास्तोत्रं समाप्तम्॥